# E-Text

| | | |
|---|---|---|
| पत्रस्य नाम | : | लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्) |
| पत्रसंख्या | : | V |
| पाठ्यांशनाम | : | अन्तादिवच्च इत्यारभ्य अचोऽन्त्यादि टि इति यावत्, तस्य परमाम्रेडितम् |
| पाठ्यांशसंख्या | : | 11 |

पाठ्यांशस्य मुख्याः अंशाः :

1) अन्तादिवच्चेति सूत्रम्, सूत्रार्थः।
2) अनेन सूत्रेण प्रातिपदिकत्वप्रत्ययत्वादयो धर्मा एवातिदिश्यन्ते इति।
3) वर्णधर्मा नातिदिश्यन्त इत्यत्र किं प्रमाणम्?
4) स्थानिवद्भावेन सूत्रमिदं गतार्थं वा।
5) एकादेशं प्रति पूर्वपरयोः प्रत्येकं स्थानित्वमस्ति वा।
6) प्राच्छंतीत्यादौ रेफस्य विसर्गः कथं न।
7) त्रिपाद्यां बहिरङ्गपरिभाषा न प्रवर्तत इति।
8) वा सुप्यापिशलेः इति सूत्रम्।
9) अचोऽन्त्यादि टि इति सूत्रम्।
10) ओत्वोष्ठयोः समासे वा इति वार्तिकम्।

विषयसूची


1.0 : अन्तादिवच्च - उपोद्घातः
1.1 : अनेन सूत्रेण प्रातिपदिकत्वप्रत्ययत्वादयो धर्मा एवातिदिश्यन्ते
1.2 : वर्णधर्मा नातिदिश्यन्त इत्यत्र किं प्रमाणम्
1.3 : स्थानिवद्भावेन सूत्रमिदं गतार्थं वा
1.4 : एकादेशं प्रति पूर्वपरयोः प्रत्येकं स्थानित्वमस्ति वा
2.0 : प्राच्छंतीत्यादौ रेफस्य विसर्गः कथं न
2.1 : त्रिपाद्यां बहिरङ्गपरिभाषा न प्रवर्तत इति
3.0 : वा सुप्यापिशलेः इति सूत्रम्
3.1 : अचोऽन्त्यादि टि इति सूत्रम्
3.2 : ओत्वोष्ठयोः समासे वा इति वार्तिकम्


ePathshala पाठशाला A Gateway to all Post Graduate Courses

1.0 अन्तादिवच्च - उपोद्घातः

उप ऋच्छति इत्यत्र (उपसर्गादृति धातौ , उरण् रपरः) इति सूत्राभ्याम् आर् इति वृद्धौ एकादेशे उपार्च्छति इति रूपं सिध्यति। तत्र आर् इत्येकादेशः पूर्वपरयोः स्थाने कृतः पूर्वस्य परस्य वा अवयव इति जिज्ञासायाम् इदं सूत्रं व्याख्यायते।

(एकः पूर्वपरयोः) इति सूत्रमनुवर्तते। (यथासंख्यमनुदेशः समानाम्) इति परिभाषया च पूर्वस्यान्तवत् परस्यादिवदिति यथासंख्यमन्वयः। अन्तादिशब्दाभ्याम् एकादेशस्य स्थानिनौ गृह्येते। पूर्वपरशब्दौ तद्घटितसमुदायपरौ। एवञ्च – योऽयमेकादेशः स पूर्वस्य समुदायस्य अन्तवत् परस्य समुदायस्य आदिवत् च स्यात् - इति सूत्रार्थः सम्पद्यते।

1.1 अनेन सूत्रेण प्रातिपदिकत्वप्रत्ययत्वादयो धर्मा एवातिदिश्यन्ते

एकादेशात् प्राक् एकादेशस्थानिघटितस्य पूर्वसमुदायस्य परसमुदायस्य च ये प्रातिपदिकत्व-सुबन्तत्व-प्रत्ययत्वादयो व्यवहाराः ते एकादेशे कृते तदन्तपूर्वसमुदायस्य तदादिपरसमुदायस्य च भवन्ति - इत्येवम् अनेन सूत्रेण अतिदिश्यते एकादेशस्थानिनौ यौ वर्णौ तन्मात्रवृत्तिधर्माणाम् एकादेशे अतिदेशार्थं न इदं सूत्रम्।

(राम औ) इति स्थिते अकार-औकारयोः स्थाने (वृद्धिरेचि) इति सूत्रेण औकारे एकादेशे - (राम् औ) इति जायते। अत्र औकारस्य सुप्त्वम्, राम् इत्यस्य एकदेशविकृतम् अनन्यवदिति न्यायेन प्रकृतित्वम्। यस्मात् सुप् प्रत्ययो विहितः (राम इत्यस्मात् औ प्रत्ययो विहितः) तदादितदन्तसमुदायस्य विहिता पदसंज्ञा इदानीं ( राम् औ ) इत्यत्र राम् इति शब्दे प्रकृतित्वम् औकारस्य सुप्त्वं च विना न सिध्येत्।

वर्णमात्रवृत्तिधर्माणामतिदेश इति स्वीकारे खट्वाभिरित्यादौ दोषः। तथाहि- पूर्वपरशब्दाभ्याम् एकादेशस्थानिनोः वर्णयोः ग्रहणे (खट्व)शब्दात् टापि (खट्व आ) इति स्थिते (अकः सवर्णे दीर्घ) इति अकार-टापोः स्थाने आकारे कृते, ततः तृतीयाबहुवचने (खट्वा भिस्) इति स्थिते एकादेशस्य आकारस्य अकारवद्भावेन (अतो भिस ऐस्) इति ऐसादेशः आपद्येत। तथा- (अयजे इन्द्रम्) इत्यादौ (अयज इ इन्द्रम्) इत्यवस्थायाम् गुणे एकादेशे एकारे तस्य इकारवद्भावे सति, इन्द्रशब्दस्थेन इकारेण सवर्णदीर्घः प्राप्नोति।

### 1.2 वर्णधर्मा नातिदिश्यन्त इत्यत्र किं प्रमाणम्

अस्य सूत्रस्य ईदृशार्थस्वीकारे (वर्णमात्रवृत्तिधर्माणामतिदेशो नास्ति, किन्तु प्रातिपदिकत्व सुबन्तत्वादयो धर्मा अतिदिश्यन्ते इत्येवं स्वीकारे) किं प्रमाणमिति चेत् - (षत्वतुकोरसिद्धः) इति सूत्रेण तुकि कर्तव्ये एकादेशशास्त्रम् असिद्धमिति वचनमेव प्रमाणम्। तथाहि - (अधि इण् ल्यप् - अधि इ य) इति स्थिते इकारयोः स्थाने ईकारे एकादेशे कृते (अध् ई य) इत्यवस्थायाम् एकादेशस्य ईकारस्य इकारवद्भावेन (ह्रस्वस्य पिति कृति तुक्) इति तुक्सिद्धौ किमर्थम् एकादेशशास्त्रस्यासिद्धत्वविधानम्।

“वर्णाश्रये च अन्तादिवत्त्वप्रतिषेधो वक्तव्यः, न वा अताद्रूप्यातिदेशात्” इति वार्तिके ‘अताद्रूप्यातिदेशात्’ इत्यंशोऽपि अत्र प्रमाणम्। अताद्रूप्यातिदेशादित्यस्य ‘अन्तादिवर्ण मात्रवृत्तिधर्मानतिदेशात्’ इत्यर्थः।

### 1.3 स्थानिवद्भावेन सूत्रमिदं गतार्थं वा

**शेखरे - स्थानिवद्भावेन तु नैतल्लभ्यम्। अप्राधान्येनालाश्रयणात्। किञ्च एकादेशे वर्णयोरेव स्थानित्वम्, न समुदायस्येति भी ई भिय इत्यादावेकादेशविशिष्टे**

धातुत्वानापत्तिः। धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात्। आनुमानिकस्थान्यादेश-कल्पकवाक्यम् अन्तादिघटित समुदायस्य एकादेशघटित आदेश इत्येव, न तु प्रत्येकं तयोः स्थानित्वबोधकं, तथा सति स्वाश्वशब्दस्य स्थानिवत्त्वेन स्वशब्दतया तत ईरिन् शब्दे वृद्ध्यापत्तेः। किञ्च भवत्सम्मतस्य उभयत आश्रयणे नान्तादिवत् इत्यस्यासङ्गतौ भवत्सम्मताभीयादित्याद्यसिद्धिः। स्थानीवत्त्वं तु उभयत आश्रयणे इष्यत एव। अन्यथा अचः परस्मिन्नित्यस्यापि उभयत आश्रयणे अप्रवृत्त्यापत्तौ प्लायत इत्याद्यसिद्धिः।

अथ - अन्तादिवच्च इति सूत्रस्य यद् यत् फलं तत् सर्वं स्थानिवद्भावेनापि सिध्यति - इति कश्चन आक्षेपः।

क्षीरपेण इत्यादौ (क्षीरप इन) इति स्थिते गुणे एकारे एकादेशे (क्षीरप् ए न) इति जाते एकादेशस्य पूर्वान्तवद्भावेन क्षीरपे इत्यत्र एकाजुत्तरपदत्वं विद्यते। ततश्च (एकाजुत्तरपदे णः) इति सूत्रं प्रवर्तते। यदि (अन्तादिवच्च) इति सूत्रं न स्यात् तर्हि स्थानिवद्भावेन एकाजुत्तरपदत्वं सम्पादनीयम्। परन्तु (अनल्विधौ) इति निषेधात् तन्न सिध्यति। यतः (एकाजुत्तरपदे णः) इति णत्वविधौ अप्राधान्येन अल् आश्रीयते। किञ्च एकादेशनिरूपितं स्थानित्वम् अकार-इकारनिष्ठम्। न तु क्षीरप इति समुदाये स्थानित्वमस्ति। आनुमानिकस्थान्यादेशभावः (क्षीरप इन)-(क्षीरपेन) इति समुदाययोः भवति, न तु (क्षीरप), (इन) इत्यनयोः प्रत्येकं स्थानित्वमस्ति।

अनेन सूत्रेण लभ्योऽर्थः स्थानिवद्भावेन न सिध्यतीत्यत्र (भियो हेतुभये षुक्) इति सूत्रे (भियः) इति निर्देशोऽपि प्रमाणम्। तथाहि- (ईकारान्तस्य भीधातोः) इति तत्र अर्थः आवश्यकः, भापयते इत्यत्र षुगभावार्थम्। स च अर्थः (भी ई - भी) इति ईकारप्रश्लेषेण साधितो भाष्ये। (भी ई) इति स्थिते ईकार-ईकारयोः स्थाने सवर्णदीर्घे

एकादेशे भी इति जाते ततः ङसि, भी इत्यस्य धातुत्वाभावात् (अचि श्नुधातुभ्रुवां य्वोरियङुवङौ) इत्यनेन विहित इयङ् न स्यात्। ततश्च भियः इति निर्देशो नोपपद्यते। स्थानिवद्भावेन धातुत्वं न सिध्यति, ईकारद्वयसमुदाये स्थानिनि धातुत्वस्याभावात्। आनुमानिकस्थानित्वमपि भी-ई इति समुदाये विद्यते, तस्मिंश्च समुदाये धातुत्वं नास्ति, किन्तु भी इत्यत्रैव धातुत्वम्। तस्माद् ईदृशस्थले स्थानिवद्भावेन न सिध्यति इति कृत्वा अन्तादिवच्च इति सूत्रं कृतम्। कृतैकादेशे भी इत्यत्र तु पूर्वान्तवद्भावेन धातुत्वं सुलभम्।

### 1.4 एकादेशं प्रति पूर्वपरयोः प्रत्येकं स्थानित्वमस्ति वा

एकादेशनिरूपितं स्थानित्वं यदि पूर्वपरयोः प्रत्येकं स्यात् तर्हि (स्व अश्व - स्वाश्व) इति दीर्घैकादेशे कृते स्वशब्दस्य अश्वशब्दस्य च प्रत्येकम् आनुमानिकं स्थानित्वं स्यात्। तथा सति स्वाश्वशब्दात् ईरिन्शब्दे परे (स्वादीरेरिणोः) इति सूत्रेण वृद्धिरेकादेशः प्राप्नुयात्, स्वाश्वशब्दस्य स्थानिवद्भावेन स्वशब्दत्वात्।

किञ्च यदि एकादेशस्थले स्थानिवद्भावमाश्रित्य अन्तादिवद्भावविधायकसूत्रं त्यज्यते तर्हि (उभयत आश्रयणे नान्तादिवद्) इति वचनेन यत्र अन्तादिवद्भावः प्रतिषिध्यते तत्र (उभयत आश्रयणे न स्थानिवद्) इति वक्तव्यं भवति। अन्यथा (अभीयात्) इत्यादि न सिध्येत्। तथाहि - अभिपूर्वकस्य इण् धातोः आशीर्लिङि (अभि इण् यात्) इति स्थिते सवर्णदीर्घैकादेशे (अभी यात्) इति जाते (एतेर्लिङि) इति सूत्रेण ह्रस्वः कर्तव्यः। तत्र पूर्वान्तवद्भावेन (अभी) इत्यस्य उपसर्गत्वं, परादिवद्भावेन (ई) इत्यस्य इण्त्वं च युगपत् सम्पादनीयम्। (उभयत आश्रयणे नान्तादिवत्) इति वचनात् तत्र (अन्तादिवच्च) इत्यस्याप्रवृत्तौ (एतेर्लिङि) इत्यस्यापि प्राप्त्यभावेन (अभीयात्) इति सिध्यति। अन्यथा (अभियात्) इत्यनिष्टं स्यात्।

अस्तु, (उभयत आश्रयणे न स्थानिवद्) इति वचनं क्रियतामिति चेत् - तथा कर्तुं न शक्यते। यतः - उभयत आश्रयणे स्थानिवद्भावः प्रतिषिध्यते चेत् अनिष्टं स्यात्। तथाहि- (प्र अयते) इत्यत्र सवर्णदीर्घैकादेशे (प्रायते) इति जाते (उभयत आश्रयणे न स्थानिवद्) इति यदि स्थानिवद्भावः प्रतिषिध्येत तर्हि (अचः परस्मिन् पूर्वविधौ) इत्यनेन स्थानिवद्भावमाश्रित्य (उपसर्गस्यायतौ) इत्यनेन कर्तव्यं लत्वं न सिध्येत्। लत्वे सति प्लायते इति रूपमिष्यते।

**2.0 प्रार्च्छतीत्यादौ रेफस्य विसर्गः कथं न**

**शेखरे - निर्देशादिति। नच कर्तरि चर्षीत्यादौ गुणस्य पदद्वयसमन्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वात् रेफाभावेन न विसर्ग इति वाच्यम्। गुणस्येव पदद्वयसम्बन्धिरेफछरात्मकवर्णद्वयाश्रितत्वेन विसर्गस्यापि तत्वात्। परनिमित्तकत्वमुभयोः समम्। किञ्च कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वात् अन्तरङ्गाभावेन पूर्वस्यान्तरङ्गनिरूपितबहिरङ्गत्वाभावात् कथं तस्यासिद्धत्वप्रतिपादनम्।**

अथ उपसर्गादृति धातौ इति सूत्रम्। अवर्णान्तादुपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः वृद्धिरेकादेशः स्यादिति सूत्रार्थः। प्रार्छति उपार्छति इत्याद्युदाहरणम्। (प्र ऋच्छति) (उप ऋच्छति) इति स्थिते अकार-ऋकारयोः स्थाने (उपसर्गादृति धातौ) इति सूत्रेण एकादेशे रपरे आकारे कृते प्रार्च्छति उपार्च्छति इति सिध्यति। तत्र एकादेशस्य पूर्वान्तवद्भावे सति (प्रार् छति) (उपार् छति) इत्येवं रेफान्तं पदं सम्पद्यते। ततश्च (खरवसानयोर्विसर्जनीयः) इति सूत्रेण रेफस्य विसर्गः प्राप्नोति। परन्तु (उभयथर्क्षु, कर्तरि चर्षिदेवतयोः) इत्यादिनिर्देशात् (परपदस्थ-ऋकार-स्थानिकस्य रेफस्य पूर्वान्तवद्भावलब्धपदान्तत्वमादाय विसर्गः कर्तुं न शक्यते) - इति ज्ञायते।

(असिद्धं बहिरङ्गमन्तरङ्गे) इति परिभाषया अत्र परिहारो वक्तुं शक्यते वा इति विचारितं शेखरे। तथाहि - (प्र ऋच्छति) इत्यादौ पदद्वयसम्बन्धिवर्ण-द्वयापेक्षत्वात् एकादेशो बहिरङ्गः। अन्तरङ्गे विसर्गे कर्तव्ये बहिरङ्गस्य एकादेशस्य असिद्धत्वात् रेफाभावात् विसर्गो न भविष्यति - इति वक्तव्यम्। परन्तु इदं समाधानं न सम्यक्। कुतः, यथा एकादेशः पदद्वयसम्बन्धिवर्णद्वयापेक्षः तथैव विसर्गोऽपि पदद्वयसम्बन्धिवर्णद्वयापेक्ष एव।

तस्मात् एकादेशविसर्गयोः अन्तरङ्गबहिरङ्गभावो वक्तुं न शक्यते। किञ्च - सप्तमाध्याये (वाह ऊठ्) इति सूत्रेण ज्ञापिता असिद्धपरिभाषा त्रिपाद्यां कार्यकालपक्षे प्रवर्तेत। यथोद्देशपक्षे सप्तमाध्यायस्थपरिभाषास्थले त्रिपादीस्था विधयः पूर्वत्रासिद्धमित्यसिद्धत्वात् नोपतिष्ठन्ते। कार्यकालपक्षेऽपि यद्यपि परिभाषा त्रिपाद्याम् उपस्थातुमर्हति तथापि (खरवसानयोर्विसर्जनीयः) इति सूत्रे उपस्थितायाः परिभाषायाः एकादेशशास्त्रं प्रति असिद्धत्वात् अभावः। अथवा अन्तरङ्ग-खरवसानसूत्र-दृष्ट्या बहिरङ्गस्य एकादेशस्य असिद्धत्वात् अभावः। अन्यतरस्य इतरदृष्ट्या यथाकथञ्चित् असिद्धत्वात् अभावः।

Pathshala
पाठशाला
A Gateway to all Post Graduate Courses

अत्रेदं चिन्तनीयं यत् - असिद्धपरिभाषा अनुमिता भवति। पूर्वत्रासिद्धमिति तु प्रत्यक्षोक्तम्। तथाच अन्तरङ्गशास्त्रं यदा त्रिपादीस्थं भवति तदा किम् असिद्धपरिभाषया सपादसप्ताध्यायीस्थस्य बहिरङ्गशास्त्रस्यासिद्धत्वं वक्तव्यम् उत पूर्वत्रासिद्धमित्यनेन अन्तरङ्गस्य त्रिपादीस्थस्य असिद्धत्वं वक्तव्यम्। अनुमितया परिभाषया प्रत्यक्षवाक्यबाधा पेक्षया प्रत्यक्षवाक्येन अनुमितवाक्यबाध एवोचितः। तस्मात् कार्यकालपक्षेऽपि अन्तरङ्गपरिभाषायाः त्रिपाद्याम् अप्रवृत्तिः - इत्येव स्वीकार्यम्। यथाकथमपि एकस्य असिद्धत्वेनाभावे तन्निरूपितम् अन्तरङ्गत्वं वा

बहिरङ्गत्वं वा अन्यस्य वक्तुं न शक्यते। एवं च प्रकृते विसर्गप्राप्तिः (उभयथर्क्षु, कर्तरि चर्षिदेवतयोः) इत्यादिनिर्देशरूपज्ञापकादेव वारणीया।

### 2.1 त्रिपाद्यां बहिरङ्गपरिभाषा न प्रवर्तत इति

त्रिपाद्यां बहिरङ्गपरिभाषाया अनुपस्थितिरित्येव सिद्धान्तः। अत एव नपदान्तसूत्रे निगाल्यते माषवपनी इत्यादौ लत्वणत्वादिसिध्यर्थं (पूर्वत्रासिद्धे न स्थानिवद्) इति वचनापवादतया (तस्य दोषः संयोगादिलोप-लत्व-णत्वेषु) इति वचनमेवारब्धम्। त्रिपाद्यां बहिरङ्गपरिभाषोपस्थितौ तु तयैव लत्वादिकं सिध्यति। अत्र कश्चन प्रश्नः - प्र ऋच्छति इत्यादिस्थले (उपसर्गादृति धातौ) इत्यनेन एकादेशे रपरे आकारे कृते प्रार्छति इति रूपं सिध्यति। परन्तु - (ऋत्यकः) इति सूत्रमस्ति। (पदान्ताः अकः ऋति परे प्रकृत्या स्युः, ह्रस्वश्च वा) - इति तदर्थः। तेन अत्रापि प्रकृतिभावः कथं न भवति - इति।

तत्र इदं समाधानम् - (उपसर्गादृति धातौ) इति सूत्रे धातुग्रहणं मास्तु, (उपसर्गादृति) इत्येव सूत्रमस्तु, उपसर्गेण धातुराक्षिप्यते। तथा च धातुग्रहणं किमर्थम् - इति चेत् (उपसर्गादृति)(धातौ) इति योगविभागं कृत्वा पुनर्वृद्धिः विधीयते। प्र ऋच्छति इत्यत्र (उपसर्गादृति) इति पूर्वेण योगेन वृद्धिरेकादेशो विधीयते, प्रार्छति इति। यः पाक्षिकः प्रकृतिभावः प्राप्नोति (ऋत्यक) इत्यनेन तं बाधितुं पुनः वृद्धिरेकादेशो विधीयते। तथा च प्रार्छति इत्येव रूपम्।

अथ - (प्रगतः ऋद्धः) इत्यर्थे समासे कृते (प्र ऋद्धिः) इति स्थिते कथं सन्धिः। प्र इत्युपसर्गः, ऋध् धातुः। तथा च (उपसर्गादृति धातौ) इत्यनेन वृद्धिरेकादेशो भवति वा, न भवति। कुतः। (यां क्रियां प्रति यस्य उपसर्गसंज्ञा तद्वाचके ऋकारादौ धातौ परे) - इत्यर्थः। प्रकृते गमनक्रियानिरूपिता

प्रशब्दस्योपसर्गसंज्ञा, न तु ऋधिधातुवाच्यक्रिया निरूपिता। तथा च आद्गुण इत्यनेन प्रर्द्ध इत्येव रूपं, नतु प्रार्द्ध इति वृद्धिरत्र भवति।

### 3.0 वा सुप्यापिशलेः इति सूत्रम्

**शेखरे - सुब्धाताविति। सुबन्तप्रकृतिके धातावित्यर्थः। तुल्यास्यसूत्रे उपार्कारीय-तीत्यादेरेतदुदाहरणत्वस्य भाष्ये उक्तत्वात्। शास्त्रे सुबन्तस्य धातुप्रकृतिकत्वेनोक्ततया तत्प्रकृतिके इति व्याख्यानमेवोचितम्।**

अथ - (वा सुप्यापिशलेः) इति सूत्रम्। तेन सूत्रेण (अवर्णान्तादुपसर्गात् ऋकारादौ सुब्धातौ परे पूर्वपरयोः वृद्धिरेकादेशो वा स्यात्) इत्युच्यते। (प्र ऋषभीयति) इति स्थिते प्रर्षभीयति, प्रार्षभीयति इति रूपद्वयम्। सुब्धातुः इत्यस्य सुबन्तप्रकृतिकः धातुरित्यर्थः। (सुप आत्मनः क्यच्) इत्यादिसूत्रैः सुबन्तात् विहिता ये क्यच् काम्यच् इत्यादयः प्रत्ययाः तदन्ताः धातवः सुब्धातवः। सुबन्तात् क्यजादीन् प्रत्ययान् विधाय तदन्तानां (सनाद्यन्ता धातवः) इति सूत्रेण धातुसंज्ञा विहिता।

यथा प्रार्छतीत्यादौ ऋत्यक इति प्रकृतिभावः प्राप्नोति, धातौ इति योगविभागेन तद्वारणं च क्रियते तथैवात्रापि प्रकृतिभावः प्राप्नोति, तथैव वारणं च कार्यम्। ऋषभस्य समीपमित्यर्थे उपर्षभम्, उपर्षभमिच्छति उपर्षभीयति इत्यत्र वा सुप्यापिशलेः इति न प्रवर्तते, उप इत्यस्य उपसर्गत्वाभावात्।

### 3.1 अचोऽन्त्यादि टि इति सूत्रम्

अथ - शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकम्। तच्च पररूपं टेः परवर्णस्य च स्थाने भवति। तत्र टिः नाम क इति जिज्ञासायाम् (अचोऽन्त्यादि टि) इति सूत्रमवतरति। अचां मध्ये योऽन्त्यः स आदिर्यस्य तत् टिसंज्ञं स्यात् - इति कौमुद्यां सूत्रार्थ उच्यते। सूत्रे अचः इति निर्धारणे षष्ठी। यद्यपि निर्धारणं बहूनां समवधाने

epg pathshala
A Gateway to all Post Graduate Courses

भवति, तथा च निर्धारणषष्ठ्यन्तं सर्वदा बहुवचनान्तमेव प्रयोक्तव्यमित्यस्ति तथापि सौत्रत्वात् न दोषः। अन्ते भवः अन्त्यः। (अन्त्यादि) इति बहुव्रीहिः। अन्त्यः आदिः यस्य तत् अन्त्यादि। अन्त्यशब्दः अवयववाचित्वात् अवयविसापेक्षः। तथा च (सापेक्षमसमर्थवत्) इति न्यायेन असामर्थ्यात्, (समर्थः पदविधिः) इति परिभाषितत्वात्, कथम् आदिशब्देन समासः क्रियते। इति कश्चन प्रश्नोऽत्र भवति। तत्रोच्यते, सापेक्षत्वादसामर्थ्येऽपि, यत्र गमकत्वं भवति तत्र समासो भवत्येव। नित्यसापेक्षस्थले असामर्थ्येऽपि समास इष्यते, यथा देवदत्तस्य गुरुकुलमिति। शकन्ध्वादिषु पररूपैकादेशस्य उदाहरणं मार्तण्ड इति। मृताण्डादागत इत्यर्थे अण्-प्रत्यये आदिवृद्धौ मार्ताण्ड इति रूपम्। यदा अण्प्रत्यय उत्पद्यते तदानीमेव पररूपम्। विग्रहवाक्य मृताण्डशब्दे सवर्णदीर्घ एव। मार्त अण्ड इति स्थिते पररूपे मार्तण्ड इति। अत्र कश्चन संशयः - मार्त इत्यत्र तकारोत्तरवर्ती केवलः अकारः कथं अन्त्यादि भवति। स एव तस्य आदिः कथं, ततश्च तस्य टिसंज्ञा कथं स्यात् इति। अत्रोत्तरम् - व्यपदेशिवदेकस्मिन् इति न्यायेन एकस्मिन्नेव वर्णे तदवयवकसमुदायत्वम् आरोप्य तथा व्यवहारः। व्याकरणे आरोपस्य आवश्यकता नास्ति - इति नागेशः। (शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः) इति पातञ्जलयोगसूत्रानुसारेण विकल्पात्मकज्ञानं व्याकरणे अङ्गीक्रियते। अत एव - एष वन्ध्यासुतो याति इत्यादिस्थले बाह्यार्थकत्वाभावेऽपि आरोपाभावेऽपि बौद्धमर्थमादाय प्रातिपदिकत्वादि उपपाद्यते।

### 3.2 ओत्वोष्ठयोः समासे वा इति वार्तिकम्

अथ - ओत्वोष्ठयोः समासे वा इति वार्तिकम्। अवर्णात् ओत्वोष्ठयोः अचि परे (ओत्वोष्ठावयवे ओकारे परे) पूर्वपरवर्णघटिते (अवर्ण-ओकारघटिते) समासे

पररूपमेकादेशो वा स्यात् -इति वार्तिकार्थः। उदाहरणं - स्थूलोतुः स्थूलौतुः, स्थूलोष्ठः स्थूलौष्ठः इत्यादि।

**शेखरे - अत्र समर्थपरिभाषा नोपतिष्ठते। समासेऽङ्गुलेः सङ्गः इत्यादौ समास ग्रहणेन पदविधिरिति सूत्रस्वरसेन भाष्यादिस्वारस्येन च पदत्वेन सुबन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकारात्। ओत्वोष्ठादिमात्रस्य पदत्वाभावात्।**

अत्र समासग्रहणं किमर्थमिति विचारितं शेखरे। तथाहि - सामर्थ्यरहितस्थले वा व्यपेक्षासामर्थ्यस्थले वा अस्य वार्तिकस्य प्रवृत्तिः नेष्यते। किन्तु एकार्थीभावस्थले एव। स च विशेषः पदोद्देश्यकविधिषु (समर्थः पदविधिः) इति परिभाषायाः उपस्थित्या लभ्यते। इदं वार्तिकं पदोद्देश्यकमेव। ओतुशब्दं ओष्ठशब्दं च उद्दिश्य विधीयते। एकार्थीभावरूपं सामर्थ्यं च समासे एव सम्भवति। तथा च समासग्रहणं विनापि अस्य वार्तिकस्य एकार्थीभावे सत्येव प्रवृत्तिः सम्भवति। किमर्थं समासग्रहणम् - इति प्रश्नः। अत्र समाधानं - यद्यपि ओत्वोष्ठशब्दौ उद्दिश्य पररूपं विधीयते, तथापि तावता अस्य पदविधित्वं न भवति। कुतः, पदत्वेन वा सुबन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैव समर्थपरिभाषाया उपस्थानम्। पदत्वेन वा सुबन्तत्वेन वा साक्षादुद्देस्यता यत्र नास्ति, किन्तु पदोद्देश्यकता अस्ति, तादृशस्थलेऽपि समर्थपरिभाषोपस्थानं यद्यङ्गीक्रियते तर्हि (समासेऽङ्गुलेः सङ्गः) इति सूत्रे समासग्रहणं न कृतं स्यात्, (अङ्गुलेः सङ्गः) इत्यलम्।

अत्र वार्तिकस्य, (अवर्णात् ओत्वोष्ठयोः परयोः पररूपमेकादेशः) इत्येवमर्थो नोक्तः। किन्तु अवर्णात् ओत्वोष्ठयोः अचि परे इत्यर्थ उच्यते, अवर्णस्य ओत्वोष्ठावयव-ओकारस्य च समासघटकत्वमस्ति चेत् सूत्रं प्रवर्तते। अन्यथा दन्त्योष्ठ्यः इत्यादिस्थले पररूपं न सिध्येत्।

अथ - (तस्य परमाम्रेडितम्) इति सूत्रम्। अष्टमाध्याये (सर्वस्ये द्वे) इति द्वित्वाधिकारीय सूत्रेण यदा द्वित्वं क्रियते तदा तस्मिन् द्विरुक्तसमुदाये परस्य आम्रेडितसंज्ञा भवति। अत्र सूत्रे (तस्य परम्)इति प्रयोगे कश्चन विशेषः। परशब्दस्य दिग्वाचकत्वात् (अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते) इति सूत्रानुसारेण तस्मात् परमिति भाव्यम्। अत्र वदन्ति - तस्य परमिति सूत्रकारप्रयोगादेव ज्ञायते अवयववाचिपरशब्दयोगे षष्ठी साधुरिति। अत्र तस्यग्रहणं स्पष्टार्थम्। सर्वस्य द्वे इत्यतः द्वे इत्यनुवर्त्य षष्ठ्यन्ततया विपरिणामेनान्वये सति द्वयोः परमाम्रेडितसंज्ञं स्यादित्यर्थः सिध्यति। सर्वस्य द्वे इत्यस्मिन् प्रकरणे संज्ञाकरणात् एतत्प्रकरणविहितद्विरुक्तपरस्यैव आम्रेडितसंज्ञा।

epathshala पाठशाला
A Gateway to all Post Graduate Courses